# एकादशः पाठः




# जटायुशौर्यम् ।

महर्षिः वाल्मीकिः रामायणं रचितवान् । रामायणे सप्तकाण्डानि सन्ति । १) बालकाण्डम् २) अयोध्याकाण्डम् ३) अरण्यकाण्डम् ४) किष्किन्धाकाण्डम् ५) सुन्दरकाण्डम् ६) युद्धकाण्डम् ७) उत्तरकाण्डम् ।

२४,००० श्लोकेषु सम्पूर्णं रामायणं रचितम् अस्ति । रामायणे निसर्गचित्रणं पशुपक्षिणां चित्रणम् अपि अस्ति । रामायणस्य अरण्यकाण्डात् ४७ सर्गात् ४९ सर्गपर्यन्तं केचन श्लोकाः अत्र चिताः। एतेषु श्लोकेषु जटायुरावणयोः सङ्घर्षस्य वर्णनं विद्यते ।

- रामायणे के पशु-पक्षिणः साहाय्यीभूताः अभवन् ?
- यदा समाजे अन्यायकारकः प्रसङ्गः भवति तदा अस्माभिः किं कर्तव्यम् ?



वनवासकाले सीतां छलेन एकाकिनीं कृत्वा रावणः परिव्राजकवेषेण पर्णकुटीं सम्प्राप्तः । तस्मै भिक्षां दातुं सीता बहिरागता । तं परिव्राजकं रावणमिति ज्ञात्वा तस्य हेतुं च अवगम्य परुषशब्दैः तस्य निर्भर्त्सनां कृतवती । तथापि बलेन रावणः ताम् अपहर्तुं प्रायतत । ततः अग्रे . . .

सा गृहीताऽ**तिचुक्रोश** रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता रामे दूरगते वने ।।१।।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता ।
वनस्पतिगतं गृध्रं **ददर्शा**यतलोचना ।।२।।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा ।।३।।

तं शब्दमवसुप्तस्तु जटायुरथ **शुश्रुवे** ।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च **ददर्श** सः ।।४।।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्**व्याजहार** शुभां गिरम् ।।५।।



निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरः परो यद्धि विगर्हयेत् ।।६।।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ।।७।।

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
**चकार** बहुधा गात्रे व्रणान्पतगसत्तमः ।।८।।

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजा **बभञ्ज** पतगोत्तमः ।।९।।

ततः क्रोधाद्दशग्रीवो गृध्रराजमपोथयत् ।
पक्षौ पार्श्वौ च पादौ च खड्गमुद्धृत्य सोऽच्छिनत् ।।१०।।

स छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा ।
**निपपात** हतो गृध्रो धरण्यामल्पजीवितः ।।११।।

**अन्वयः** **पठत-बोधत**

१) रामे वने दूरगते, रावणेन गृहीता सा यशस्विनी सीता दुःखार्ता (भूत्वा) 'राम' इति अतिचुक्रोश ।

२) तदा सा आयतलोचना सुदुःखिता (सीता) करुणाः वाचः विलपन्ती वनस्पतिगतं गृध्रं ददर्श ।

३) हे आर्य जटायो, अनेन पापकर्मणा राक्षसेन्द्रेण अनाथवत् अकरुणं ह्रियमाणां मां पश्य ।

४) अवसुप्तः तु सः जटायुः अथ तं शब्दं शुश्रुवे, क्षिप्रं रावणं निरैक्षद् वैदेहीं च ददर्श ।

५) ततः पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् (जटायुः) शुभां गिरं व्याजहार ।

६) "(हे रावण,) परदारा-अभिमर्शनाद् नीचां मतिं निवर्तय । यद् हि परः विगर्हयेत् तद् धीरः न समाचरेत्।

७) (यद्यपि) अहं वृद्धः (अस्मि), त्वं युवा, धन्वी, सरथः कवची, शरी (असि), तथापि वैदेहीम् आदाय त्वं कुशली (भवन्) न गमिष्यसि ।"

८) महाबलः, पतगसत्तमः (जटायुः) तु तस्य तीक्ष्णनखाभ्यां चरणाभ्यां (रावणस्य) गात्रे बहुधा व्रणान् चकार।

९) ततः महातेजाः पतगोत्तमः (जटायुः) अस्य (रावणस्य) मुक्तामणिविभूषितं सशरं चापं चरणाभ्यां बभञ्ज।

१०) ततः सः दशग्रीवः क्रोधात् गृध्रराजम् अपोथयत् । खड्गम् उद्धृत्य पक्षौ पार्श्वौ पादौ च अच्छिनत्।

११) (तदा) रक्षसा रौद्रकर्मणा सहसा हतः छिन्नपक्षः सः अल्पजीवितः गृध्रः धरण्यां निपपात ।

## भाषाभ्यासः



**१. लिट्‌रूपाणि चित्वा लिखत ।**

पश्य अतिचुक्रोश चकार
निपपात अच्छिनत् अभवन्
गमिष्यसि बभञ्ज व्याजहार
निवर्तय ददर्श अपोथयत्
चुक्रोश विगर्हयेत्
समाचरेत् शुश्रुवे

**२. नाम-तालिकां पूरयत ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | गृध्रौ | | द्वितीया |
| कर्मणा | | | तृतीया |
| | | धन्विभ्यः | पञ्चमी |

**३. सन्धिविग्रहं कुरुत ।** अ) ततस्सा आ) ददर्शायतलोचना इ) वृद्धोऽहम् ई) तथाप्यादाय

**४. माध्यमभाषया उत्तरं लिखत ।** जटायुरावणयोः सङ्घर्षस्य वर्णनं कुरुत ।

**५. समानार्थकशब्दान् लिखत ।** सीता, रावणः, शृङ्गम्, तुण्डम्, पतगः

६. धातु–तालिकां पूरयत ।


| लकारा: | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: |
| --- | --- | --- | --- | --- |
| लङ् | | | अभवन् | प्रथम: पुरुष: |
| लृट् | गमिष्यसि | | | मध्यम: पुरुष: |
| लट् | | पश्याव: | | उत्तम: पुरुष: |

७. सर्वनाम–तालिकां पूरयत ।


| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
| --- | --- | --- | --- |
| अस्य | | | षष्ठी |
| | आवाम्–नौ | | द्वितीया |
| | | ता: | प्रथमा |

८. विशेषणानि अन्विष्य लिखत ।


अ.




आ.




इ.




९. सूचनानुसारं कृती: कुरुत ।

अ) सीता वनस्पतिगतं गृध्रं ददर्श ।(लङ्–लकारे परिवर्तयत ।)

आ) जटायु: रावणस्य गात्रे व्रणान् चकार ।(लङ्–लकारे परिवर्तयत ।)

इ) रावण: खड्गमुद्धृत्य पक्षौ अच्छिनत् ।(पूर्वकालवाचकम् अव्ययं निष्कासयत ।)

74EA8F